# Gajanana Stuti Naradamunikrita

# નારદમુનિકૃતા ગજાનનસ્તુતિઃ

## Document Information

Text title : Gajanana Stuti Naradamunikrita

File name : gajAnanastutiHnAradamunikRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM chaturthaH khaNDaH | adhyAyaH 40 | 4.40. 31-48||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# નારદમુનિકૃતા ગજાનનસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
દેવર્ષય ઊચુઃ ।
ગજાનન નમસ્તુભ્યં સર્વેષાં બીજરૂપિણે ।
નિર્બીજાય ગણેશાય વિઘ્નાનાં પતયે નમઃ ॥ ૩૧॥
અનન્તાયૈકદન્તાય હેરમ્બાય નમો નમઃ ।
ચતુર્ભુજાય સર્વેશ સર્વપૂજ્યાય તે નમઃ ॥ ૩૨॥
સર્વસિદ્ધિપ્રદાત્રે ચ સુરાસુરમયાય તે ।
સિદ્ધિબુદ્ધિપ્રચાલાય સિદ્ધિબુદ્ધિપતે નમઃ ॥ ૩૩॥
અગુણાય ગુણેશાય ગુણરૂપાય ગૌણિને ।
માયામયાય માયાયાશ્ચાલકાય પરાત્મને ॥ ૩૪॥
સર્વાદયે મહોદાર પરાક્રમપરાય તે ।
સ્વાનન્દવાસિને તેઽસ્તુ નમઃ સ્વાનન્દદાયિને ॥ ૩૫॥
યોગાકારાય યોગાનાં સ્વામિને શાન્તિદાયિને ।
બ્રહ્મણસ્પતયે તેઽસ્તુ બ્રહ્મણાં બ્રહ્મણે નમઃ ॥ ૩૬॥
અનાધારાય સર્વેષામાધારાય નમો નમઃ ।
આદિમધ્યાન્તહીનાયાદિમધ્યાન્તાય તે નમઃ ॥ ૩૭॥
પરશ્વઙ્કુશહસ્તાય ત્રિનેત્રાય મહોદર ।
નમો મૂષકવાહાય મૂષકધ્વજિને નમઃ ॥ ૩૮॥
નમો નમસ્તે સકલાય ધામ્ને સદા સુખાનન્દકરાય પાત્રે ।
જગત્ સુસ્રષ્ટ્રે સકલસ્ય હન્ત્રે ગુણૈર્વિહીનાય ગણાધિપાય ॥ ૩૯॥
વિદેહરૂપાય પરાય ભોક્ત્રે બોધેન હીનાય સુસાઙ્ખ્યકાય ।
સદા સ્વબુદ્ધૌ પરસંસ્થિતાય ગજાત્મરૂપાય નમો નમસ્તે ॥ ૪૦॥
બોધહીનં ચ યદ્બ્રહ્મ તદેવ ગજવાચકમ્ ।
ગજચિહ્નેન યોગીન્દ્રાઃ પશ્યન્તિ ત્વાં ગજાનનમ્ ॥ ૪૧॥
યથા મુખસ્ય ચિહ્નેન જ્ઞાયન્તે માનવાદયઃ ।

તથા વિદેહચિહ્નેન જ્ઞાયસે ત્વં તુ યોગિભિઃ ॥ ૪૨॥
વિદેહં ગજરૂપં યત્તેન તે મુખમુચ્યતે ।
ગણેશસ્ય પ્રાપ્તિકરં ગજાનન નમોસ્તુ તે ॥ ૪૩॥
કિં સ્તવામ ગણાધીશ યત્ર વેદાદિકાસ્તથા ।
યોગિનઃ શાન્તિમાપન્નાસ્તં વયં શરણં ગતાઃ ॥ ૪૪॥
સ્તુત્વા વિઘ્નેશ્વરં તે તુ પ્રણેમુસ્તં પુનઃ પુનઃ ।
તાનુવાચ ગણાધીશો હર્ષયન્ સર્વભાવવિત્ ॥ ૪૫॥
(ફલશ્રુતિઃ)
ગજાનન ઉવાચ ।
સ્તોત્રં ભવત્કૃતં દેવા ઈશ્વરા મુનયશ્ચ મે ।
સર્વસિદ્ધિપ્રદં પૂર્ણં ભવિષ્યતિ નિરન્તરમ્ ॥ ૪૬॥
યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ ભક્તિયન્ત્રિતઃ ।
પઠનાચ્છ્રવણાદસ્ય સન્તુષ્ટોઽહં વિશેષતઃ ॥ ૪૭॥
વરદોઽહં વૃણુત વો દાસ્યામિ વરમીપ્સિતમ્ ।
તપસા ભક્તિભાવેન સ્તોત્રેણ તુષ્ટિમાગતઃ ॥ ૪૮॥

ઇતિ નારદમુનિકૃતા ગજાનનસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ચતુર્થઃ ખણ્ડઃ । અધ્યાયઃ ૪૦ । ૪.૪૦। ૩૧-૪૮॥

- .. mudgalapurANaM chaturthaH khaNDaH . adhyAyaH 40 . 4.40. 31-48..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Gajanana Stuti Naradamunikrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*